CC-0. In Public Domain. Digitization by eGangotri

ॐ

भगवच्चन्द्रिका

परिशिष्टः



२०१८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वेदान्त

26

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यं वदन्त्यमलात्मानः पुरुषं प्रकृतेः परम् ।
चिद्रूपं परमानन्दं वंदे देवं विनायकम् ।।

गन्धर्वतन्त्रम् १।१

अनाद्यन्तोऽपराधीनः स्वाधीनभुवनत्रयः ।
जयत्यविरतो व्याप्तविश्वः कालो विनायकः ।।

तन्त्रराजतन्त्रम् १।१

या वेदान्तार्थतत्त्वैकस्वरूपा परमेश्वरी ।
नामरूपात्मना व्यक्ता सा मां पातु सरस्वती ।।७
व्यापिनी ज्ञप्तिरूपैका सा मां पातु सरस्वती ।२२॥
नामरूपात्मकं सर्वं यस्यामावेश्यते पुनः । सरस्वती
व्यापिनि प्रहरूपैका सा मां पातु सरस्वती रहस्योपनिषत्

श्री शिव उवाच ।
स्तुवीत पञ्चभिः श्लोकैस्तन्नित्यं सर्वसिद्धये ।
प्रातः प्रबोधसमये जपात्सुदिवसं भवेत् ।।१
नमस्ते नाथ भगवन् शिवाय शिवरूपिणे ।
विद्यावतारसंसिद्ध्यै स्वीकृतानेकविग्रह ।।२
नवाय नवरूपाय परमार्थैकरूपिणे ।
सर्वाज्ञानतमोभेदभानवे चिद्घनायते ।।३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

स्वतन्त्राय दयाल्कृप्तविग्रहाय शिवात्मने ।
परतन्त्राय भक्तानां भव्यानां भव्यरूपिणे ॥४
विवेकिनां विवेकाय विमर्शाय विमर्शिनाम् ।
प्रकाशानां प्रकाशाय ज्ञानिनां ज्ञानरूपिणे ॥५
पुरस्तात्पार्श्वयोः पृष्ठे नमस्कुर्यादुपर्यधः ।
सदा मे चित्तरूपेण विधेहि भवदासनम् ॥६
इति श्रीतन्त्रराजतन्त्रे प्रथमपटले श्रीशिवस्तोत्रम् ।

गणेशग्रहनक्षत्रयोगिनीराशिरूपिणीम् ।
देवीं मंत्रमयीं नौमि मातृकां पीठरूपिणीम् ॥१
प्रणमामि महादेवीं मातृकां परमेश्वरीम् ।
कालहल्लोहलोल्लोल-कलनाशमकारिणीम् ॥२
यदक्षरैकमात्रेऽपि संसिद्धे स्पर्द्धते नरः ।
रविताक्ष्यैन्दुकन्दर्पशङ्करानलविष्णुभिः ॥३

यदक्षरशशिज्योत्स्नामण्डितं भुवनत्रयम् ।
वन्दे सर्वेश्वरीं देवीं महाश्रीसिद्धमातृकाम् ॥४

यदक्षरमहासूत्रप्रोतमेतज्जगत्त्रयम् ।
ब्रह्माण्डादिकटाहान्तं तां वन्दे सिद्धमातृकाम् ॥५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यदेकादशमाधारं बीजं कोणत्रयोद्भवम् ।
ब्रह्माण्डादिकटाहान्तं जगदद्यापि दृश्यते ॥६
अकचादिततोन्नद्धपयसाक्षरवर्गिणीम् ।
ज्येष्ठाङ्गवाहृहृत्पृष्ठकटिपादनिवासिनीम् ॥७
तामीकाराक्षरोद्धारां सारात्सारां परात्पराम् ।
प्रणमामि महादेवीं परमानन्दरूपिणीम् ॥८
अद्यापि यस्या जानन्ति न मनागपि देवताः ।
केयं कस्मात् क्व केनेति सरूपारूपभावनाम् ॥९
वन्दे तामहमक्षय्यमातृकाक्षररूपिणीम् ।
देवीं कुलकलोल्लोलप्रोल्लसन्तीं परां शिवाम्॥१०
वर्गानुक्रमयोगेन यस्या मात्राष्टकं स्थितम् ।
वन्दे तामष्टवर्गोत्थमहासिद्ध्यष्टकेश्वरीम् ॥११
कामपूर्णजकाराद्यश्रीपीठान्तर्निवासिनीम् ।
चतुराज्ञाकोशभूतां नौमि श्रीत्रिपुरामहम् ॥१२
इति द्वादशभिः श्लोकैः स्तवनं सर्वसिद्धिकृत् ।
देव्यास्त्वखण्डरूपायाः स्तवनं तव तद्यतः ॥१३
इति श्रीतन्त्रराजतन्त्रे द्वितीयपटले श्रीदेवी-स्तोत्रम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीशिव उवाच ।

ॐ नमस्सच्चिदानन्दाद्वितीयाखण्डब्रह्मणे ।
अचलाय नमोऽजायाऽक्रियकूटस्थविष्णवे ॥१
अनन्ताय प्रबोधाय नमो ज्योतिस्स्वरूपिणे ।
नमस्ते स्वप्रकाशाय शिवाय परमात्मने ॥२
जगदाधारभूताय नमो विश्वान्तरात्मने ।
नारायण ऋषीकेश वासुदेव नमोस्तु ते ॥३
केशवाच्युत भोः कृष्ण हरे माधव निर्गुण ।
श्रीराम परमेशान जनार्दन नमोस्तु ते ॥४
त्वय्यनन्ते परानन्दे स्वप्रबोधघने यदा ।
सर्गोत्पत्तिविधिज्ञानस्वभावो जायते तदा ॥५
गुणानां समतावस्था रज्जौ सर्पवदुत्थिता ।
अधिष्ठानाभिधः साक्षी तद्योगात्पुरुषश्च त्वम् ॥६
सत्वोद्रेकाच्च सा शक्तिर्मायाऽऽवरणसंज्ञिता ।
तत्संबन्धाच्च त्वं विष्णो सर्वज्ञेशनिमित्तकः ॥७
रजोद्रिक्ता च सा माया विक्षेपमहदात्मिका ।
तद्योगाद्धेमगर्भस्त्वं क्रियाज्ञानात्मको भवेत् ॥८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तमोद्रेकाच्च विक्षेपादहंकाराभिधा स्मृता ।
तद्योगात्त्वम्भवेद्विष्णो प्रधानपुरुषो विराट् ॥९
ततो व्योमानिलाग्न्यब्भूसूक्ष्माणि प्रभवन्ति वै ।
पञ्चीकृततमोभागैरनन्ताण्डानि चित्त्वयि ॥१०
भुवनानि शरीराणि तत्र त्वं सृजसि प्रभो ।
रजोभागभवाः प्राणास्तथा कर्मेन्द्रियाणि च ॥११
देवाज्ञानेन्द्रियारायन्तःकरणानि च सत्त्वतः ।
क्षिप्तानण्डेऽक्षमान्वीक्ष्य तत्संघातान्हि त्वं हरे ॥१२
तदा चित्प्रतिबिम्बेन प्रवेशोऽविद्यया कृतः ।
आवृणोत्यपराभेदं दृग्दृश्योर्ब्रह्मसर्गयोः ॥ १३
स्वाविद्यावशतः कर्त्ता भोक्ता त्वं जीवसंज्ञकः ।
एकस्त्वम्बहुधाजातो भोग्यभोक्तेशभेदतः ॥१४
एवं त्वयि चिदम्भोधौ ब्रह्माण्डादितरङ्गकाः ।
मायावातेरिताः सर्वे तच्छान्तौ ते लयङ्गताः ॥१५
त्वदुन्मेषनिमेषाभ्यामण्डानाम्प्रभवाप्ययौ ।
त्वद्रोमकूपेष्वण्डानि फलान्यौदुम्बरे यथा ॥१६
उपादानञ्चोर्णनाभिर्ह्येकः स्थूलतया यथा ।
लिङ्गदेहतयाऽभिन्ननिमित्तं तन्तुकर्मणि ॥१७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

उपादानस्त्रपञ्चस्य मायामाश्रित्य त्वन्तथा ।
तत्संस्कारतयाऽभिन्ननिमित्तं विश्वकर्मणि ॥१८
अतोऽभिन्ननिमित्तोपादानं स्वारोपितस्य त्वम् ।
मायाविलसितं विश्वं स्यादनिर्वचनीयकम् ॥१९
स्वरूपात्यागपूर्वेण यद्विशेषेण वर्त्तनम् ।
तद्वै विवर्त्तकं प्रोक्तं शुक्तिकारजतं यथा ॥२०
सच्चिदानन्दरूपस्यापरित्यागेन वै तथा ।
विश्वाकारेण त्वञ्जातस्ततो विश्वं विवर्तकम्॥२१
मृत्तिकादिविकारेषु यथा सत्यं मृदादिकः ।
शुक्तिकादिविवर्तेषु यथा सच्छुक्तिकादिकाः ॥२२
तथा त्वं चिद्विवर्त्तेषु सत्यं सच्चित्प्रियात्मकः ।
त्वद्विलासमिदं विश्वमाप्तकामस्य बालवत् ॥२३
बिम्बप्रतिबिम्बाभ्यां यथा बिम्बो द्विधा भवेत् ।
तथेश जीवरूपौ हि त्वयि नाथ विकल्पितौ ॥२४
चुम्बकस्य च सान्निध्याद्यथा ह्याकर्षणक्रिया ।
तथा त्वय्यपि कर्तृत्वं विकल्पं न च वास्तवम् ॥२५
यथा घटमठाकाशौ सङ्गहीनौ निरन्तरम् ।
तथा देहत्रयस्थोऽपि निस्सङ्गस्त्वं चिदात्मकः॥२६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रज्जुसर्पे यथा रज्जुर्निर्विकारः प्रवर्तते ।
स्वविवर्त्ते तथा त्वं हि विकाररहितः सदा ॥ २७
सुवर्णकारणाद्भिन्नं यथा हि रुचकं ह्यसत् ।
भवच्चित्कारणाद्भिन्नं वितथं वै जगत्तथा ॥२८
युष्मच्चिन्मयैकेऽस्मिन्विवादं कुत्र वै प्रभो ।
त्वयि शुद्धे बन्धमोक्षौ स्वप्नबन्धनमुक्तवत् ॥२९
त्वं सर्वहृदयस्थो वै त्वयि सर्वं प्रतिष्ठितम् ।
वस्तुतस्त्वं निराधारो वासुदेवपदः स्मृतः ॥३०
यथा शुक्तिपरिज्ञानाद्रजतन्न प्रवर्तते ।
त्वद्विवर्तमिदं तद्वत्त्वज्ज्ञानाद्वै निवर्त्तते ॥३१
त्वन्मूलमखिलं विश्वं त्वत्तो भिन्नं न विद्यते ।
त्वत्कृपालेशमात्रेण सर्वज्ञानाति भक्तिमान् ॥ ३२
त्वद्भक्तिविमुखानां वै ज्ञानं कल्पशतैर्न च ।
तस्मादहं महाविष्णो मृगयामि त्वदङ्घ्रिकम् ॥३३
दयादृष्टिकटाक्षेण पश्य नाथ दयानिधे ।
शरणागतञ्च मां पाहि संसारक्लेशसागरात् ॥३४
महाविष्णोरिदं स्तोत्रं यः पठेद्भक्तिसंयुतः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाञ्छितञ्च तथा ज्ञानं तस्य शीघ्रं प्रजायते ।।३५
इति शिवरहस्ये श्रीमहाविष्णुस्तोत्रम् ।

श्रीशिव उवाच ।

हृदयकमलमध्ये निर्विशेषं निरीहम्
हरिहरविधिवेद्यं योगिभिर्ध्यानिगम्यम् ।
जननमरणभीतिभ्रंसि-सच्चित्स्वरूपम्
सकलभुवनबीजं ब्रह्म चैतन्यमीडे ।।१
नमस्ते सते सर्वलोकाश्रयाय
नमस्ते चिते विश्वरूपात्मकाय ।
नमोऽद्वैततत्त्वाय मुक्तिप्रदाय
नमो ब्रह्मणे व्यापिने निर्गुणाय ।।२
त्वमेकं शरण्यं त्वमेकं वरेण्यं
त्वमेकं जगत्कारणं विश्वरूपम् ।
त्वमेकं जगत्कर्तृपातृप्रहर्तृ
त्वमेकं परं निश्चलं निर्विकल्पम् ।।३
भयानां भयं भीषणं भीषणानां
गतिः प्राणिनां पावनं पावनानाम् ।
महोच्चैः पदानां नियन्तृ त्वमेकं
परेषां परं रक्षकं रक्षकाणाम् ।।४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

परेश प्रभो सर्वरूपप्रकाशिन्
अनिर्देश्य सर्वेन्द्रियागम्य सत्य ।
अचिन्त्याक्षर व्यापकाव्यक्ततत्व
जगद्भासकाधीश पायादपायात् ॥५
तदेकं स्मरामस्तदेकं जपामः
तदेकं जगत्साक्षिरूपं नमामः ।
सदेकं निधानं निरालम्बमीशं
भवाम्भोधिपोतं शरण्यं व्रजामः ॥६
पञ्चरत्नमिदं स्तोत्रं ब्रह्मणः परमात्मनः ।
यः पठेत् प्रयतो भूत्वा ब्रह्मसायुज्यमाप्नुयात् ॥७
प्रदोषेऽदः पठेन्नित्यं सोमवारे विशेषतः ।
श्रावयेद्बोधयेत् प्राज्ञो ब्रह्मनिष्ठान् स्वबान्धवान् ॥८

इति श्रीमहानिर्वाणतन्त्रे तृतीयोल्लासे
ब्रह्मणः स्तोत्रम् ।

श्रीभगवानुवाच ।
ज्ञानं परमगुह्यं मे यद्विज्ञानसमन्वितम् ।
सरहस्यं तदङ्गं च गृहाण गदितं मया ॥१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यावानहं यथाभावो यद्रूपगुणकर्मकः ।
तथैव तत्त्वविज्ञानमस्तु ते मदनुग्रहात् ।।२
अहमेवासमेवाग्रे नान्यद्यत्सदसत्परम् ।
पश्चादहं यदेतच्च योऽवशिष्येत सोऽस्म्यहम् ।।३
ऋतेऽर्थम् यत्प्रतीयेत न प्रतीयेत चात्मनि ।
तद्विद्यादात्मनो मायां यथाभासो यथा तमः ।।४
यथा महान्ति भूतानि भूतेषूच्चावचेष्वनु ।
प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहम् ।।५
एतावदेव जिज्ञास्यं तत्त्वजिज्ञासुनात्मनः ।
अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा ।।६
एतन्मतं समातिष्ठ परमेण समाधिना ।
भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ।।७
इति श्री मद्भागवते द्वितीयस्कन्धे नवमोध्याये
चतुःश्लोकी भागवतम् ।

ॐ नमः श्रीसिद्धिलक्ष्मीदेव्यै ।
ऐं नमोस्तुते महामाये देहातीते निरञ्जने ।
प्रत्यङ्गिरे जगद्धात्रि राजलक्ष्मि नमोस्तुते ।।१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वर्णदेहा महागौरी साधकेच्छा प्रवर्तिका ।
पददेहा महास्फाला महासिद्धिसमुत्थिता ।।२
तत्त्वदेहोत्थिता देवी साधकानुग्रहा स्मृता ।
महाकुण्डलिनीं भित्त्वा सहस्रदलभेदिनी ।।३
इडापिङ्गलमध्यस्था वायुभूता खगामिनी ।
मृणालतन्तुरूपिण्या सुषुम्नामध्यचारिणी ।।४
नादान्ते नादसंस्थाना नादातीता निरञ्जना ।
सूक्ष्मे स्थूलेऽतिसंसूक्ष्मे अचिन्त्येऽचिन्त्यविग्रहे ।।५
परापरपरे शान्ते ब्रह्मलीने परे शिवे ।
अचिन्त्यरूपचरिते अचिन्त्यार्थफलप्रदे ।।६
एकाकिनी विश्वमाता करवीरनिवासिनी ।
महास्फालप्रदा नित्या महामेलापकारिणी ।।७
बिन्दुमध्यस्थिता देवी कुटिलार्द्धेति चन्द्रिका ।
द्वादशान्तालया देवी षोडशाधारवासिनी ।।८
कार्यकारणसंभिन्ना चैतन्या नाडिमध्यगा ।
शक्तिमूले महाचक्रे नवधा संव्यवस्थिता ।।९
अशरीरा परादेवी शरीरे प्राणरूपिणी ।
सुधाद्रवसमाकारा ॐकारपरविग्रहा ।। १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

विद्युल्लतानिभागौरी भावाभावविवर्जिता ।
स्वान्तःपदास्थिता नित्यं परेशी शान्तविग्रहा ।।११
सत्वरूपा रजोरूपा तमोरूपा त्रयात्मिका ।
त्वमेव देवी सर्वेषां भूतानां प्राणदायिनी ।। १२
त्वमेव सृजते विश्वं लीलया बहुधा स्थिता ।
मालिनी परमादेवी श्मशानपरबंधिनी ।। १३
हृत्तालुभेदिनी चक्रे विचक्रे चक्रसुन्दरी ।
बिन्दुद्वारनिरोधेन दिव्यव्याप्ता नमोस्तु ते ।।१४
सूर्यकोटिप्रतीकाशे चन्द्रकोटयतिनिर्मले ।
कन्दर्पकोटिलावण्ये कोटिब्रह्माण्डविग्रहे ।। १५
निराकाशे निराभासे निर्लेपे निरविग्रहे ।
सकलाख्ये महामाये वरदे सुरपूजिते ।। १६
खकारफकारवह्निस्थैकारान्तरसुन्दरी ।
मकारान्तरवर्गेषु पञ्चपिण्डात्मके शिवे ।। १७
सर्पवत्कुटिलाकारे नादशक्तिपरे मले ।
बिन्दुचक्रस्थिता नित्या जालन्धरस्वरूपिणी ।। १८
तुर्ये वै तुर्यपीठस्थे पूर्णपीठव्यवस्थिते ।
कामाख्ये च कलातीते कामाख्ये च भगोद्भवे ।। १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्मग्रन्थिकलाटोपे मध्ये प्रेतप्रवाहिनी ।
शिवसर्वगते सूक्ष्मे नित्यानन्दे महोत्सवे ।। २०
मंत्रनायिकि मंत्रज्ञे विन्ध्यकोणान्तवासिनि ।
पञ्चपीठिकमध्यस्थे मेरुनायिकि शर्वरि ।। २१
खेचरी भूचरी चैव शक्तित्रयप्रवाहिनी ।
कालान्ताग्निसमुद्भूते कालकालान्तकालिनी ।।२२
कालिकाक्रमसंबंधिकालि द्वादशमण्डले ।
त्रैलोक्यदहनी देवी सा च मूर्तिः त्रयोदशी ।। २३
सृष्टिस्थितिसंहारेषु अनाख्याख्ये महाक्रमे ।
भासाख्या गुह्यकाली च निर्वाणेशी परेश्वरी ।। २४
झंकारिणी भैरवी च स्वर्णकोटेश्वरी तथा ।
राजराजेश्वरी चण्डा अघोरेशी निशेश्वरी ।। २५
सुन्दरी त्रिपुरा पद्मा तारा पद्मेश्वरी शिवा ।
क्रममण्डलमध्यस्था क्रमेशी कुब्जिकाम्बिका ।। २६
ज्येष्ठबालप्रभेदेन कुब्जाख्या उग्रचण्डिका ।
ब्रह्माणी रौद्री कौमारी वैष्णवी दीर्घनासिका ।। २७
वज्रिणी चर्चिका लक्ष्मी पूजयेद्दिव्यमातरम् ।
असिताङ्गो रुरुश्चण्डो क्रोधसोन्मत्तसंज्ञकः ।। २८

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

कपाली भीषणाख्यश्च संहारश्चाष्टमस्तथा ।
भक्तानां साधकानां च लक्ष्मीः सिद्धिं प्रयच्छति।।२९
सिद्धिलक्ष्मीर्महादेवी भैरवेनानुकीर्तिता ।
साधकद्वेष्टकानां च सर्वकर्मविभञ्जनी
विपरीतकरी देवी प्रत्यङ्गिरा नमोस्तु ते।। ३०
कालादि ग्रसते सर्वं ग्रहभूतादिडाकिनी ।
साधकं रक्षते देवी कालसंकर्षणीं नमः ।। ३१
शिवं प्रयच्छते देवी रक्षते लीलया जगत् ।
प्रत्यङ्गिरां नमस्यामि अचिन्तितार्थसिद्धये ।।३२
राज्यलाभप्रदां देवीं रक्षणीं भक्तवत्सलाम् ।
प्रत्यङ्गिरां नमस्यामि अचिन्तितार्थसिद्धये ।। ३३
सर्वशत्रुप्रमर्दन्तीं दुरितक्लेशनाशिनीम् ।
प्रत्यङ्गिरां नमस्यामि सिद्धिलक्ष्मीं जयप्रदाम् ।।३४
आपदाम्भोधितरणीं परनिर्वाणदायिनीम् ।
प्रत्यङ्गिरां नमस्यामि सिद्धिलक्ष्मीं जयप्रदाम् ।।३५
राज्यदां धनदां लक्ष्मीं मोक्षदां दुःखनाशिनीम् ।
प्रत्यङ्गिरां नमस्यामि सिद्धिलक्ष्मीं जयप्रदाम् ।।३६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

दुष्टशत्रुप्रशमनीं महाव्याधिविनाशिनीम् ।
प्रत्यङ्गिरां नमस्यामि सिद्धिलक्ष्मीं जयप्रदाम् ।।३७
कलिदुःखप्रशमनीं महोत्पातविनाशिनीम् ।
प्रत्यङ्गिरां नमस्यामि सिद्धिलक्ष्मीं जयप्रदाम् ।। ३८
अचिन्त्यसिद्धिदां धात्रीं चिन्तितार्थफलप्रदाम् ।
प्रत्यङ्गिरां नमस्यामि सिद्धिलक्ष्मीं जयप्रदाम् ।।३९
राजोपसर्गशमनीं मृत्यूपद्रवनाशिनीम् ।
प्रत्यङ्गिरां नमस्यामि सिद्धिलक्ष्मीं जयप्रदाम् ।।४०
राजमान्यां राज्यलक्ष्मीं राज्येष्टफलदायिनीम् ।
प्रत्यङ्गिरां नमस्यामि सिद्धिलक्ष्मीं जयप्रदाम्।।४१
सिद्धिलक्ष्मीं महाविद्यां महासिद्धिप्रदायिकाम् ।
पठेद्वा पाठयेद्वापि स्तोत्रं प्रत्यङ्गिराभिधम् ।। ४२
पठनात् शत्रुसैन्यानि स्तम्भयेद्भञ्जयेत्क्षणात् ।
अचिन्तितानि सिद्ध्यन्ति पठनात् सिद्धिमाप्नुयात्।।
महादोषप्रशमनं महाव्याधिविनाशनम् ।
सिंहव्याघ्रग्रहभयं राजोपद्रवनाशनम् ।। ४४
ग्रहपीडाजलाग्नीनां नाशनं देवि शान्तिदम् ।
पूजाकाले महास्तोत्रं ये पठिष्यन्ति साधकाः ।। ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषां सिद्धिर्न दूरेस्ति देव्याः सन्तुष्टिदायकम् ।
यन्नास्ति तन्न सिद्धिः स्यात् कौलिके कुलशासने ।।४६
यं यं चिन्तयते कामं तं तं सिद्धयति लीलया ।
सत्यं सत्यं महादेवि कौलिके तत्समो न हि ।। ४७
अर्द्धरात्रौ समुत्थाय दीपप्रज्वलिते निशि ।
पठते स्तोत्रमेतत्तु सर्वं सिद्धयति चिन्तितम् ।।४८
पुरश्चर्याविनानेन स्तोत्रपाठेन सिद्धयति ।
मण्डले प्रतिमाग्रे वा मण्डालाग्रे पठेद्यदि ।। ४९
इदं प्रोक्तं महास्तोत्रमचिन्तितार्थसिद्धिदम् ।
अन्यदेवरतायाथ न देयन्तु कदाचन ।
दातव्यं भक्तियुक्ताय कुलदीक्षारताय च ।। ५१
इति श्रीत्रिदशदामले करवीरे श्रीसिद्धिनाथावतारितः सिद्धिलक्ष्मीमहामायास्तवः द्वाविंशतितमः पटलः सम्पूर्णः ।

नारद उवाच ।
मृत्युञ्जय प्राणप्रभो श्रुता मंत्रास्त्वनेकशः ।
अधुना श्रोतुमिच्छामि त्वत्तोऽमृतकलास्तुतिम् ।। १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीनीललोहित उवाच ।

आद्या चिच्छक्तिरूपा
प्रकृतिमहदहङ्कारतन्मात्रहीना
निस्त्रैगुण्या निरीहा
निलयक्षयकरी शुद्धचैतन्यरूपा ।
प्रत्यग्ज्योतिर्विवर्त-
प्रकटितपरमानन्दसंदोहधारा
सा देवी सिद्धिलक्ष्मी-
रपनयतु मम द्वैतभावं भवानी ॥२

यस्यामोतं समस्तं
जगदिदमधिकं प्रत्ययातीतबुद्ध्या
यस्यां च छिन्नभिन्नं
भवति सपदि वै यान्ति सूत्रोपचारात् ।
द्वैताकारे परास्ते .
विषयिगुणमहापञ्चभूते निरस्ते
कैवल्यानन्तमूर्तिः
स्फुरति हृदि सदा केवलं सिद्धिलक्ष्मीः ॥ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तेषां सिद्धिर्न दूरेस्ति देव्याः सन्तुष्टिदायकम् ।
यन्नास्ति तन्न सिद्धिः स्यात् कौलिके कुलशासने ।।४६
यं यं चिन्तयते कामं तं तं सिद्धयति लीलया ।
सत्यं सत्यं महादेवि कौलिके तत्समो न हि ।। ४७
अर्द्धरात्रौ समुत्थाय दीपप्रज्वलिते निशि ।
पठते स्तोत्रमेतत्तु सर्वं सिद्धयति चिन्तितम् ।।४८
पुरश्चर्याविनानेन स्तोत्रपाठेन सिद्धयति ।
मण्डले प्रतिमाग्रे वा मण्डालाग्रे पठेद्यदि ।। ४९
इदं प्रोक्तं महास्तोत्रमचिन्तितार्थसिद्धिदम् ।
अन्यदेवरतायाथ न देयन्तु कदाचन ।
दातव्यं भक्तियुक्ताय कुलदीक्षारताय च ।। ५१

इति श्रीत्रिदशदामले करवीरे श्रीसिद्धिनाथावतारितः सिद्धिलक्ष्मीमहामायास्तवः द्वाविंशतितमः पटलः सम्पूर्णः ।

नारद उवाच ।
मृत्युञ्जय प्राणप्रभो श्रुता मंत्रास्त्वनेकशः ।
अधुना श्रोतुमिच्छामि त्वत्तोऽमृतकलास्तुतिम् ।। १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीनीललोहित उवाच ।

आद्या चिच्छक्तिरूपा
प्रकृतिमहदहङ्कारतन्मात्रहीना
निस्त्रैगुण्या निरीहा
निलयक्षयकरी शुद्धचैतन्यरूपा ।
प्रत्यग्ज्योतिर्विवर्त-
प्रकटितपरमानन्दसंदोहधारा
सा देवी सिद्धिलक्ष्मी-
रपनयतु मम द्वैतभावं भवानी ॥२

यस्यामोतं समस्तं
जगदिदमधिकं प्रत्ययातीतबुद्ध्या
यस्यां च छिन्नभिन्नं
भवति सपदि वै यान्ति सूत्रोपचारात् ।
द्वैताकारे परास्ते
विषयिगुणमहापञ्चभूते निरस्ते
कैवल्यानन्तमूर्तिः
स्फुरति हृदि सदा केवलं सिद्धिलक्ष्मीः ॥ ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सृष्टचादौ सृष्टिमध्ये
तदनु च जगतामन्तकालेपि नित्या
त्रैलोक्येप्येकरूपा
परिणमति भवे या भवेत्तादृगेव ।
स्वान्ते सा सिद्धिलक्ष्मी-
र्विहरतु नितरां मामकीने चरन्ती
सार्द्धं रुद्रेण शश्व-
न्निजमहिमभरव्यापृतानन्तशक्तिः ॥ ४

यामाराध्याब्जयोनि
स्त्वधिगतविभवः संप्रसूते त्रिलोकीं
विष्णुर्यस्याः प्रसादा-
त्त्रिजगदवनकृद्दैत्यसंहारकृच्च ।
यद्भक्त्या कृत्तिवासा
रचयति जगतां ध्वंसकर्मत्रयाणां
सा मे प्रत्यङ्गिराख्या
त्रिपुरहरवधूर्मोहजालं छिनत्तु ॥ ५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योनीरूपापि शुभ्रा
विगतजनिरपि क्ष्माधरेन्द्रस्य कन्या
यानीशापि प्रसिद्ध-
प्रमथपतिपतिर्या भवघ्नापि भव्या ।
याचाकृत्याविहीना-
प्यथ च दशकरा याऽण्डरूपापि पृथ्वी
सा मे मुक्तिं विधत्तां
सकलजनपदे सिद्धिदा सिद्धिलक्ष्मीः ।। ६

रज्जौ मुक्तौ च रश्मा-
वहिसितपयसां भ्रान्तयस्तद्वदित्थं
त्वय्यंब क्ष्माणितेजो
ऽनिलजलवियतां तद्भ्रमज्ञानभाजाम् ।
भ्रान्तिज्ञाने विनष्टे
विषयविषयिणोस्तद्विशेषेक्षणेन
स्वं स्वं रूपं विभाति
क्षितिधरतनये त्वं च भास्यात्मरूपा ।। ७

भ्राजिष्णवर्कस्यबिम्बं
घनपिहितदृशस्तेन संछन्नमन्नं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

मन्यन्ते त्वामपीत्थं
कुसमयकृतिनो द्वैतजाज्ञानभाजः।
वाताच्छास्त्रेक्षणाच्च
व्युपरमति घने मोहजाले च शश्वत्
स स्याद्देदीप्यमान
स्त्वमपि खलु तथा शुद्धचैतन्यरूपा ।। ८
यत्तद्रूपं वरिष्ठं
तनुतरममलं निर्विकारं प्रशान्तं
भावाभावप्रपञ्चा-
पचयविरहितं शाश्वतं ध्यानगम्यम्
व्यक्ताव्यक्तप्रकाश-
प्रतिफलितमनिर्देश्यमोङ्काररूपं
तन्मातः सिद्धिलक्ष्मीः
स्फुरतु ममहृदि ज्ञानयोगैकगम्या ।। ९
देहातीता त्वमेवा
व्यवहितपरमानन्दरूपा त्वमेव
ब्रह्माकारा त्वमेव
त्वमसि निजकला शुद्धसत्त्वस्वभावा ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

देवि त्वं मुक्तिमूल-
प्रकृतिरसि परित्यक्तसङ्कल्पबन्धा
कर्त्री धर्त्री प्रहर्त्री
त्वमसि गुणकलागोचरापि त्वमेव ।। १०
हृद्यं नेतुं न शक्यं
तव जननि मया रूपमव्यक्तसंज्ञं
नाकारोपि त्वदीयो
दृशि न च महिमा वाचि चित्ते महत्त्वम् ।
ध्यानेनैकेन लभ्या
त्वमसि परशिवाकारपर्यङ्कलीला
किं वा योगेन तत्त-
द्गुणगणगरिमध्यायतानन्तमूर्तिः ।। ११
त्वं धृत्वा दर्शबिम्बा-
कृतिममलतनुः स्वच्छशुद्धावभासा
जीवात्स्वं प्रातिबिम्बं
कलयसि परमात्मस्वरूपात्मनिद्रा ।
तेनाभेदे प्रसिद्धे
परिणमति महामोहरागे कषाये

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भक्तानां त्वय्यकस्मा-
त्प्रभवति जननि स्वच्छकैवल्यमुक्तिः ।। १२
व्याप्तं ब्रह्माण्डमेत-
त्सकलमपिययानन्तशक्त्या भवत्या
सृष्ट्यादौ ते नियुक्ता
द्रुहिणहरिहरा देवि देवास्त्रयोपि ।
संपूर्णं कर्मसूत्रै
स्त्रिजगदिदमथो वासनाविप्रनद्धैः
का वा स्तुत्या त्रिलोक्यां
परशिवमहिले सिद्धि- लक्ष्मीस्त्वदन्या ।। १३
त्रय्यादौ तारूपा
त्वमसि मखविधावाहुतिर्मंत्रपूर्वा
वेदान्ते ब्रह्मविद्या
प्रकृतिरपि तथा कामिनीये नयत्वम् ।
मीमांसाया विधिस्त्वं
स्मृतिषु पुनरथाचारधर्मस्वरूपा
स्वाहा त्रेता सजाति
र्विविधतनुधरेष्वागमे सिद्धिलक्ष्मीः ।। १४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यद्यप्यादौ त्वमम्ब
त्रिविधगुणमयी संतनोषि प्रपंचं
यद्यप्यस्त्राणि धत्से
दशभिरपि करैर्दीप्यमानानि भासा ।
यद्यप्युग्रोग्रमूर्ति-
र्दितितनुजसुतान् हंसि विश्वोपकारो-
त्कृष्टस्वान्ता तथापि
त्रिनयनमहिषि ब्रह्मरूपासि साक्षात् ।। १५
मोहाविद्यास्मितेच्छा-
नियतिगुणफलाक्लेशकर्माशयोर्मि-
द्वेषाद्या बन्धनाय
त्रिजगति वसतां देवि पाशास्तवैव।
सच्चित्संवित्तियोगा-
नुभवनयचिदानन्दकैवल्यसत्ताः
कर्तर्य्यत्कर्तनाय
त्वदुपवितमहाभक्तयो निर्मिताः स्युः ।। १६
अद्वैतोपाधिबन्ध-
प्रशमनपरमार्थस्वरूपावभासा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

साक्षिण्यानन्दमूर्तिः
सदसदुपशमाकारचैतन्यरूपा ।
जीवाविद्याप्रमाण-
प्रकृतिनयभवापौनरावृत्तिसूक्ष्मा
बोधैकात्म्यानुभूति-
र्निखिलगतिरतस्त्वां नुमः सिद्धिलक्ष्मीम्।। १७
प्रत्यङ्गिरा त्वमसि सत्ययुगेषु चण्डा
कापालिनीति विदिता युगयोरतो नु ।
ख्याता जनन्यसि कलौ ननु सिद्धिलक्ष्मी
नामत्रयाकवलना प्रथिता त्वमेव ।। १८
अतोऽमृतकलास्तोत्रं पठेत्प्रयतमानसः ।
युङ्क्तेऽमृतेन ब्रह्मर्षे त्रिवर्गैर्वा निजेच्छया ।। १९
संसारपाशबद्धानां सर्वेषां बन्धमुक्तये ।
मया विज्ञापिता पूर्वं निरीक्ष्य भवयातनाम् ।। २०
स्वमुखेनैव देव्यै तत्स्वस्वरूपं निरूपितम् ।
सुकृतिभ्यः प्रदातव्यमतदाज्ञप्तवत्यपि ।। २१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

तन्त्रेमुष्मिन्नुत इदं मम स्तोत्रं निवेशितम् ।
जपन्नवाक्षरीं विद्यां पठन्नित्यमिमं स्तवम् ।। २२
संसाधयन्त्यञ्जसैव सिद्धिलक्ष्मीं च साधकः ।
विद्येच्छुरखिलाविद्या अधिगच्छेदतन्द्रितः ।। २३
तथार्थेच्छुर्बहूनर्थान्धर्मेच्छुर्धर्मभूरिताम् ।
निरीहः साधयेन्मुक्तिमन्ये स्वान्स्वान्मनोरथान् ।। २४

न केवलमिदं स्तोत्रं कैवल्यं संप्रसूयते ।
तारयत्यापदः सर्वा आत्मानं गृणतोऽन्वहम् ।। २५
मृधे रक्षति शस्त्रौघादरण्ये हिंस्रजन्तुतः ।
तस्करेभ्यश्च कान्तारे वात्यायां च महोदधौ ।। २६
वने दावादपि तथा नृपरोषे च बन्धनात् ।
वृष्टौ वज्रप्रपततो जलमज्जनतस्तथा ।। २७
बालग्रहं निहन्त्याशु त्रिवारपठनेन हि ।
वारेनैकेन पापौघं दारिद्र्यं शतमात्रतः ।। २८
महामारी सहस्रेण मृत्युंजयायुतेन च ।
देवीं वशयति क्षिप्रं त्रिवारं नित्यमीरयन् ।। २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यत्नेनातोमृतकलास्तोत्रं वै प्रत्यहं पठेत् ।
अपठन्नित्यपूजायां न्यूनतां चोपपादयेत् ।। ३०
यदुक्तं यदनुक्तं चारिष्टनाशफलोदयम् ।
क्षिप्रेण साधयति तत् स्तवोऽमृतकलाभिधः ।। ३१
नैषः प्रकाश्यः पाषण्डे देव्या द्वेष्टेपि नैव च ।
प्रकाशकेष्वस्य विप्र न कदापि प्रकाशयेत् ।। ३२
अयं रत्ननिधिरयं चिन्तामणिरयं तथा ।
कामधेनुरयं ज्ञेयो वाञ्छाकल्पतरुस्तथा ।। ३३
एतत्ते कथितं स्तोत्रं पूजान्ते य उदीरयेत् ।
सर्वान् कामानवाप्नोति मनसा चिन्तितान्स वै ।।३४
इति श्री नीललोहितीयकालानलतन्त्रे नित्यपूजा-
विधानेऽमृतकलाख्यं स्तोत्रं नामत्रयोविंशतितमःपटलः।

ॐ नमः श्रीसिद्धिलक्ष्मीदेव्यै ।
ॐ कारासनमारूढां श्रुतिरूपां सनातनीम् ।
परब्रह्मपरां नित्यां सावित्रीं प्रणमाम्यहम् ।।
ह्रीं विश्वरूपिणीं शान्तां चिद्रूपां प्राणरूपिणीम् ।
अकलाकलमध्यस्थां भुवनेशीं नमाम्यहम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

हूंकार त्रासितादैत्यां सुषुम्नामध्यचारिणीम् ।
कालान्ताग्निसमुद्भूतां कुब्जिकां प्रणमाम्यहम् ।।
हां शिवान्तां सदा लीनां षट्चक्रकनभेदिनीम् ।
मयूखान्तर्गतपादां परां देवीं नमाम्यहम् ।।
फ्रें धोरां प्रकृतिं सूक्ष्मां विश्वसंक्रमणक्षमाम् ।
नित्यां निरंशां घोराख्यां तां कालीं प्रणमाम्यहम् ।।
क्षौं नित्यां विष्णुमायां च निर्गुणां गुणशालिनीम् ।
महामायां मोहनीयां सिद्धिलक्ष्मीं नमाम्यहम् ।।
क्रौं कालत्रितये लीनां त्रिस्वरूपां त्रयेश्वरीम् ।
महाकुण्डलिनीं शुद्धां नमामि त्रिपुरेश्वरीम् ।।
न यस्याः क्रियते देवी लीला भुवनमालिनी ।
यस्याज्ञया प्रवर्तन्ते कालसंकर्षणीं नमः ।।
मोक्षरूपां ब्रह्मरूपां लिंगाख्यां रूपवर्जिताम् ।
सर्वस्वरूपां सर्वेशीं नौमि प्रत्यङ्गिरां शिवाम् ।।
नवाक्षरमिदं स्तोत्रं सदाशिवप्रकाशितम् ।
धारणात्पठनाद्वापि वाचां सिद्धिं लभेद् ध्रुवम् ।।
इति श्रीमहारावतन्त्रे नवाक्षरीस्तोत्रं शुभम् ।
गुरोराज्ञां समादाय ततोदः प्रत्यहं पठेत् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरी पाशुपती धन्या चतुर्वर्गफलप्रदा ।
ज्योतिरूपं महालिंगं यथाग्नौ तप्तकांचनम् ।।
पुरी पाशुपती दिव्या विद्योतते ह्यहर्निशम् ।
सूर्येणैव जगत्सर्वं ज्योतिर्लिंगस्य तेजसा ।।
अव्यक्तं परमं लिंगं प्रकाशते ह्यहर्निशम् ।
जाम्बूनदमये देशे स्वर्णदीपे शिखा यथा ।।
योगिनां मानसे नित्यं ज्योतिःशिखा विराजते ।
दीपशिखाकृतिं तां च योगिभिरेव दृश्यते ।।
धन्यास्त एव मर्त्याश्च दृष्टः पशुपतिश्च यैः ।
साक्षाद्विराजमानोसौ ज्योतिःपुंजो हृदीव च ।।
मेदिनीहृदये साक्षाद्विराजते हि सन्ततम् ।
तेजसां पुञ्जलिंगोदः सर्वलोकैरगोचरम् ।।
धन्या नैपालिका मर्त्यास्तद्रूपं गोचरं विभुम् ।
पश्यन्ति येपि देवानां साक्षात्पुनरगोचरम् ।।
यः पश्यत्यनिशं गत्वा पशुपतिं च तत्र वै ।
नरोऽसौ भक्तिभावात्मा जीवन्मुक्तो न संशयः ।।
इति श्रीस्कन्दपुराणे हिमवत्खण्डे द्विसप्ततितमोऽध्याये पशुपतिपुरीमाहात्म्यम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगिनः प्रययुस्तूर्णं नीलाचलात्प्रदर्शितुम् ।
सिद्धक्षेत्रं क्षणाद्व्योम्नः प्राप्तवन्तो मणिह्रदम् ।।
ददृशुर्योगिनः क्षेत्रं सर्वं विष्णुमयं जगत् ।
लिङ्गमयं धराशैलं व्याप्तं देव्याः कलेवरैः ।।
प्रणेमुर्दण्डवत् क्षेत्रं पाशुपतं हि योगिनः ।
तुष्टुवुः प्रेक्ष्य संभक्तचा यद्यद्दृष्टं च भावतः ।।

योगिन ऊचुः ।

विष्णोऽच्युत हरे शौरे रुद्रस्थाणो भवेश्वर ।
दुर्गे गौरि शिवे कालि नमोस्तु तेऽभिपाहि माम् ।।
सर्वैर्नः प्रहणोपेन्द्र पापमृत्युहरेश्वर ।
मृत्युञ्जवहरे देवि नमोस्तु ते नमो नमः ।।
नमः स्थित्युद्भवेशाय नमः संसारहारिणे ।
सृष्टिस्थितिविनाशिन्यै इच्छाशक्त्यै नमोस्तु ते ।।
मनोरूपाय कृष्णाय बुद्धिरूपाय शूलिने ।
शर्वाण्यै ज्ञानरूपिण्यै नमो नमोस्तु तेऽनिशम् ।।
जगद्व्याप्त्यात्मनेऽजाय लिङ्गव्याप्तकृगात्मने ।
जगद्व्याप्तस्वरूपायै नतोस्मि ते नमो नमः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पराय पद्मनाभाय परमेशाय शंभवे ।
परापरप्रतीतायै प्रणमामि नतोस्म्यहम् ।।
अर्थाय शब्दरूपाय प्रणवनादरूपिणे ।
स्वरव्यंजनरूपायै षडङ्गायै नमो नमः ।।
ऋगाज्ययज्ञरूपाय यजुर्हविःस्वरूपिणे ।
सामदहनरूपायै भोक्ताभोग्याशने नमः ।।
विष्णवेऽनन्तरूपाय रुद्राय बहुमूर्तये ।
आर्यायै बहुरूपायै वाग्ह्रदंगैर्नमो नमः ।।
शङ्खचक्रगदापद्मैः शूलादिभिस्तथायुधैः ।
खड्गचर्मांकुशैश्चान्यैर्विषमे पातु मां शिवे ।।
यो ब्रूयाद्भक्तितः स्तोत्रं पुरतः सततं बुधः ।
हरेर्देव्याः सदा शंभोः सर्वपापैर्विवर्जितः ।।
रक्षन्ति देवतास्तं वै विपत्तौ विषमेऽशुभे ।
ग्रहभूतपिशाचार्ते अन्ते ब्रह्मपदं व्रजेत् ।।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालक्षेत्र–माहात्म्ये त्रिसप्ततितमोऽध्याये देवदेवी स्तोत्रं शुभम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

योगिन ऊचुः ।
ॐ भवब्रह्मवंद्यां भवोद्भूतनन्दां
भवेशादिभिः पूजितां भव्यरूपाम् ।
स्वकीयप्रभाभिर्लसद्भीमदेहां
भवेशीं भवानीं सुभद्रां भजेहम् ।।
महाकालरात्रीस्वरूपां कृशांगीं
सुगुह्याख्यकृष्णां करालाभवक्त्राम् ।
प्रकाम्याभकालीं कुमारास्बिकार्यां
भजे भद्रकालीमकारादिरूपाम् ।।
मृडानीमपर्णां चिदानन्दरूपां
शिवामीश्वरीं चण्डिकां मोहरात्रिम् ।
सुनन्दां जयन्तीं शवालंकृतांगीं
त्रयीधर्मरूपां भजे सिंहवाहाम् ।।
महेशप्रियां पार्वतीं गुह्यकालीं
मणिभ्राजमाने सुपीठे निषण्णाम् ।
मनः कामदोग्ध्रीं सुरैः सेव्यमानां
कुमारीं प्रवंद्यां भजे ज्ञानरूपाम् ।।
विधात्रीं प्रजन्मां प्रचण्डां सुकेशीं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जगत्सारजन्मां जनिस्वान्तसंस्थाम् ।
जगज्जीवरूपां जगज्जन्यकर्त्रीं
जटाजूटशुभ्रां भजे प्राणरूपाम् ।।
तपःस्थां रजःस्थामुमां सत्वसंस्थां
प्रचण्डांशुकोटिप्रभाकाररूपाम् ।
कलादिक्षयान्तं युगस्थां त्वमेकां
त्रिलोकान्तकाले भजे सत्स्वरूपाम् ।।
लसद्योगिचिन्तारविंदाभिरामां
लसच्चित्तयोग्यां महायोगिवंद्याम् ।
रवीन्द्वाश्रयामाभिरामाक्षिभव्यां
भजे सर्ववर्षैर्मनोज्ञां सुवीणाम् ।।
नदीसिंधुखस्थां सुवीणां महोग्रां
भजेऽहं चितास्थां शिवारावरावाम् ।
हरप्राणरामां सुरैर्ध्यायमानां
विभूतिप्रचण्डासुरप्राणहारीम् ।।
निषण्णां जनानामुरःपुण्डरीके
सदा ध्यायमानां विवेकोपलब्धैः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वदन्ति स्वचित्तां विवेकात्मनस्त्वां
तवाम्बेह मायांशगोपात्मनस्ते ।।
सुरार्यस्रपानश्रवद्रक्तजिह्वा
श्रुतेरङ्गरूपा त्वमेव श्रुतिश्त्वम् ।
त्वमेवेश्वरी त्वं हि लज्जा च वीणा
त्वमाद्यामनाद्यां भजेहं भजेहम् ।।

पठेद्भक्तियुक्तः शिवाग्रे शिवात्मा
सदा धर्मकामान्मनोवाञ्छितार्थम् ।
प्रभुत्वं च मुक्तिं जयं सर्वसिद्धिं
लभेन्नात्रकार्यो विचारोत्र धीरैः ।।

इति श्रीस्कन्दपुराणे हिमवत्खण्डे नेपालक्षेत्रमाहात्म्ये त्रिसप्ततितमोध्यायं श्रीगुह्येश्वरीस्तोत्रं शुभम् ।

श्री महाकालरूद्र उवाच ।
ॐ अचिन्त्यामिताकारशक्तिस्वरुपा
प्रतिव्यक्तचधिष्ठानसत्वैकमूर्तिः ।
गुणातीतनिर्द्वंद्वबोधैकगम्या
त्वमेका परब्रह्मरूपेण सिद्धा ।। १

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अगोत्राकृतित्वादनैकान्तिकत्वा
दलक्ष्यागमत्वादशेषाकरत्वात् ।
प्रपञ्चालयत्वादनारम्भकत्वात्
त्वमेका परब्रह्मरूपेण सिद्धा ।। २
असाधारणत्वादसंबन्धकत्वा–
दभिन्नाश्रयत्वादनाकारकत्वात् ।
अविद्यात्मकत्वादनाद्यन्तकत्वात्
त्वमेका परब्रह्मरूपेण सिद्धा ।। ३
यदा नैव धाता न विष्णुर्न रुद्रो
न कालो न वा पञ्चभूतानि नाशाः ।
तदा कारणीभूतसत्त्वैकमूर्ति–
स्त्वमेका परब्रह्मरूपेण सिद्धा ।। ४
न मीमांसका नैव काणादतर्का
न साङ्ख्या न योगा न वेदान्तवेदाः ।
न देवा विदुस्ते निराकारभावं
त्वमेका परब्रह्मरूपेण सिद्धा ।। ५
न ते नामगोत्रे न ते जन्ममृत्यू
न ते धामचेष्टे न ते दुःखसौख्ये ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

न ते मित्रशत्रू न ते वन्धमोक्षौ
त्वमेका परब्रह्मरूपेण सिद्धा ।। ६
न बाला न च त्वं वयस्था न वृद्धा
न च स्त्री न षण्ढः पुमान्नैव च त्वम् ।
न च त्वं सुरो नासुरो नो नरो वा
त्वमेका परब्रह्मरूपेण सिद्धा ।। ७
जले शीतलत्वं शुचौ दाहकत्वं
विधौ निर्मलत्वं रवौ तापकत्वम् ।
तवैवाम्बिके यस्य कस्यापि शक्ति-
स्त्वमेका परब्रह्मरूपेण सिद्धा ।। ८
पपौ क्ष्वेडमुग्रं पुरा यन्महेशः
पुनः संहरत्यन्तकाले जगच्च ।
तवैव प्रसादान्न च स्वस्य शक्त्या
त्वमेका परब्रह्मरूपेण सिद्धा ।। ९
करालाकृतीन्याननानि श्रयन्ती
भजन्ती करास्त्रादिबाहुल्यमित्थम् ।
जगत्पालनायासुराणां बधाय
त्वमेका परब्रह्मरूपेण सिद्धा ।। १०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाचण्डयोगेश्वरी गुह्यकाली
कराली महाडामरी साट्टहासा ।
जगद्भासिनी चण्डिका पालिनीति
त्वमेका परब्रह्मरूपेण सिद्धा ।। ११
रुवन्ती शिवाभिर्वहन्ती कपालं
जयन्ती सुरारीन् धयन्ती प्रसन्ना ।
नटन्ती पतन्ती चलन्ती हसन्ती
त्वमेका परब्रह्मरूपेण सिद्धा ।। १२
अपादापि वाताधिकं धावसि त्वं
श्रुतिभ्यां विहीनापि शब्दं शृणोषि ।
अनासापि जिघ्रस्यनेत्रापि पश्य-
स्यजिह्वापि नानारसास्वादविज्ञा ।। १३
यथा बिम्बमेकं रवेरम्बरस्थं
प्रतिच्छायया यावदेवोदकेषु ।
समुद्भासतेऽनेकरूपं यथावत्
त्वमेकापि लोकत्रये तद्वदेव ।। १४
यथा भ्रामयित्वा मृदं चक्रमध्ये
कुलालो विधत्ते शरावं घटं च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महामोहयन्त्रेषु भूतान्यदृष्टै–
स्तथा मानुषांस्त्वं सृजस्यादि सर्गे ।। १५
यथा रङ्गरज्ज्वर्कदृष्टिष्वकस्मा–
–न्नृणां रूपदर्वीकराम्बुभ्रमः स्यात् ।
जगत्यत्र च त्वन्मये तद्वदेव
त्वमेकैव तत्तन्निवृत्तौ समस्तम् ।। १६
महाज्योतिराकारसिंहासनं यत्
स्वकीयान् सुरान् वाहयस्युग्रमूर्ते ।
अवष्टभ्य पद्भ्यां शिवं भैरवं च
स्थिता तेन मन्ये भवत्येव मुख्याः ।। १७
क्व योगासने योगमुद्राभिनीतिः
क्व गोमायुपोतस्य बालाननञ्च ।
जगन्मातरीदृक् तवापूर्वलीला
कथङ्कारमस्मद्विधैर्देवि गम्या ।। १८
विशुद्धा परा चिन्मयी स्वप्रकाशा–
मृतानन्दरूपा जगद्व्यापिका च ।
तवेदृग्विधाया निराकारमूर्तेः
किमस्माभिरन्तर्हृदि ध्यायितव्यम् ।। १९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

महाघोरकालानलज्वालजाला-
हिताभ्यन्तरासा महाट्टाट्टहासा ।
जटाभारकाला महामुण्डमाला
विशाला त्वमीदृङ्मया ध्यायसेऽम्ब ।। २०
तपो नैव कुर्वन् वपुः खेदयामि
व्रजन्नापि तीर्थं पदे खञ्जयामि ।
पठन्नापि वेदान् जनिं यापयामि
त्वदङ्घ्रिद्वयं मङ्गलं साधयामि ।। २१
तिरस्कुर्वतोऽन्यामरोपासनेभ्यः
परित्यक्तधर्माध्वरस्यास्य जन्तोः ।
त्वदाराधनाभ्यस्तचित्तस्य किं मे
करिष्यन्त्यमी धर्मराजस्य दूताः ।। २२
न मन्ये हरिं नो विधातारमीशं
न वह्निं न चार्कं न चेन्द्रादिदेवान् ।
शिवोदीरितानेकवाक्यप्रबन्धै-
स्त्वदर्चाविधिं केवलं किन्तु मन्ये ।। २३
नरा मां विनिन्दन्तु निन्दन्तु नाम
त्यजन्त्वम्ब वा ज्ञातयः सन्त्यजन्तु ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

यमीया भटा नारके पातयन्तु
त्वमेका गतिर्मे त्वमेका गतिर्मे ।। २४
महाकालरुद्रोदितं स्तोत्रमेतत्
सदा भक्तिभावेन योऽध्येति भक्तः ।
न चापन्नशोको नरोगो न मृत्यु
र्भवेत् सिद्धिरन्ते च कैवल्यलाभः ।।
इति ते कथितो देवि सुधाधाराभिधः स्तवः ।
एतस्य सततताभ्यासात् सिद्धिः करतले स्थिता।।२६
एतस्तोत्रं च कवचं गद्यं त्रितयमप्यदः ।
पठनीयं प्रयत्नेन नैमित्तिकसमर्हणे ।
त्रयाणामप्यभावात्स्यादङ्गहानिः सुरेश्वरि ।। २७
इति श्रीमहाकालसंहितायां महाकालरुद्रविरचितं
सुधाधाराभिधं स्तोत्रं संपूर्णं शुभम् ।

स्कन्दउवाच ।
सुविस्मयं तदा देवौ प्राप्तौ भृशं घटोद्भव ।
तेजःस्तम्भमपि प्रेक्ष्य श्राकर्ण्य तदुदीरितम् ।।
सस्मरतुस्तदा देवौ रुद्रं विष्णुपितामहौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वात्मानं महेशानं प्रबोधार्थं मुदात्मनः ।।
स्तोतुं प्रचक्रतुर्देवौ ईश्वराय मुदान्वितौ ।
संविधायाञ्जलिं मूर्ध्नि त्रिविधैर्भक्तिपूर्वकम् ।।

ब्रह्मविष्णू ऊचतुः ।

ॐ ज्योतिरूपाय रुद्राय ज्योतिषां पतये नमः ।
तेजःस्तम्भात्मनेजाय ईश्वराय नमो नमः ।।
अव्यक्ताय च लिङ्गाय व्यक्तलिङ्गाय भक्तिनाम् ।
व्यक्ताव्यक्तस्वरूपाय सर्वेश्वर नमोस्तु ते ।।
आद्याय समनाद्याय अन्तःस्थाय नमो नमः ।
अन्तश्चराय चान्तःस्थव्यञ्जनाय नमो नमः ।।
न जानन्ति च ये त्वैशं त एव पशवः स्मृताः ।
पशूनां पतये तेषां तुभ्यं देव नमोस्तु ते ।।
क्षितिरूपाय रुद्राय घ्राणांशाय नमो नमः ।
जलरूपाय चोग्राय रसांशाय नमो नमः ।।
तेजोरूपाय भग्र्याय चक्षुरंशाय वै नमः ।
वायुरूपाय भीमाय श्रोत्रांशाय नमो नमः ।।
व्योमरूपाय चेशाय कण्ठांशाय नमो नमः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्योमातीताय देवाय महाव्योम्ने च वै नमः ।।
अव्यक्तशब्दरूपाय व्यक्तशब्दाय वै नमः ।
अनाहतनिनादाय कारणध्वनिने नमः ।।
पराय परमेशाय परापराय वै नमः ।
परापरप्रतीताय जीविनां परमात्मने ।।
आनन्दाय तथैकाय सच्चिदानन्दरूपिणे ।
निरानन्दाय नन्दाय लिंगाय नंदिने नमः ।।
प्रणवाय स्वरांशाय श्रुतये नादरूपिणे ।
मूलरूपत्रिमात्राय मूलताराय वै नमः ।।
प्रमोहिता ये तव देवमायया
त्वदीयया त्वां न भजन्ति संततम् ।
प्रबोधया वानुककंपया हि ते
कटाक्षपीयूषसुधारया मुने ।।

स्कन्दउवाच ।

आकर्ण्य तत्स्तवं रुद्रो ब्रह्मविष्णुमुखोद्भवम् ।
देवेश्वरः सुसंतुष्टस्ताभ्यां लिंगं प्रदर्शयत् ।।
तेजःस्तम्भान्तरालेऽजौ ददृशतुः परं सुरौ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

लिङ्गमध्यगतं लिङ्गं स्थितं प्रादेशसंमितम् ।।
नैव तत्काञ्चनं रौप्यं ताम्रस्फटिकमौक्तिकम् ।
लक्षमात्रं स्थितं शान्तं केवलं तच्छिवात्मकम् ।
भूयस्तुष्टुवतुर्लिङ्गं विष्णुपितामहौ तदा ।
अव्यक्तं परमं दिव्यमभिप्रेक्ष्य घटोद्भव ।।
ॐ नमो लिङ्गदेवाय भीमरूपाय शूलिने ।
नमः पराय लिङ्गाय पशूनां पतये नमः ।।
देवदेवाधिदेवाय सर्वदेहश्रिताय च ।
व्रजावः शरणं त्वां वो रक्ष रक्षेश ते नमः ।।
भूयो ददृशतुस्तौ तं लिङ्गमध्ये व्यवस्थितम् ।
प्रकृत्या सह संयुक्तं चित्ररूपं महोज्ज्वलम् ।।
चतुर्भुजं वरैकास्यं दिव्याननं त्रिलोचनम् ।
व्याघ्राम्बरधरं देवं नागयज्ञोपवीतिनम् ।।
नागकुण्डलदिव्याङ्गं नागकेयूरमण्डितम् ।
जटामुकुटविभ्राणं ललाटचंद्रमोज्ज्वलम् ।।
त्रिशूलं डमरूबाणं चापं दधानमीश्वरम् ।
शक्तिमालिंगणेनेशं भ्राजमानं समन्ततः ।।
सहस्रपत्रपद्मस्थं पद्मासनं स्मिताननम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

बन्धूकारुणसर्वाङ्गं वन्धुराधरमैश्वरम् ।।
तत्क्रोडस्थां महादेवीं सिञ्जन्मञ्जीरपादुकाम् ।
किंकिणीद्योतकटयन्तां सर्वाभरणभूषिताम् ।।
दिव्याम्बरधरां देवीं कांचीगुणसमुज्ज्वलाम्
पीनयुग्मकुचां दिव्यां विस्तरोरुसुशोभनाम् ।।
मणिमुक्तामहाहारां कम्बुग्रीवां चतुर्भुजाम् ।
पाणिपद्मैर्दधानां वै पाशांकुशवराभयान् ।।
दिव्याननां विशालाक्षीं त्रिलोचनैः सुशोभनाम् ।
बंधूकारुणसंकाशां वंधुरोष्ठपुटां शुभाम् ।।
मकरकुण्डलोद्योतश्रवणयुगलां सदा ।
अलकापत्रलेखाभिर्भ्राजमानां स्वतेजसा ।।
चूडामणिसुविभ्राजत्खण्डेन्दुशेखरां शिवाम् ।
शिवं दक्षभुजाभ्यांतमालिंगितां स्मिताननाम् ।।
शिवं शक्त्यासमायुक्तं संप्रेक्षाशु तदन्तरे ।
तेजोभिर्दीप्यमानं तौ मेनाते दिष्टमात्मना ।।
ततश्च नेमतुस्तौ हि शिवं शक्त्या युतं मुने ।
दण्डवत्पातयित्वाङ्गं प्रणेमतुर्हि भक्तितः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

भूयस्तुष्टवतुर्देवं परिक्रम्य मुहुर्मुहुः ।
शिवं साक्षाच्छिवायुक्तमीषत्प्रहसिताननम् ।।
ॐ शिवाय शिपिविष्टाय शिवदाय नमो नमः ।
शिवायै शिवरूपायै शिवदायै नमो नमः ।।
नतास्व ईश्वरं त्वां वै जगत्पितरमञ्जसा ।
मातर्देवि जगद्धात्रि नतास्वस्त्वां भवानि च ।।
त्वमेव प्रणवः साक्षात् लज्जारूपा त्वमेव च ।।
मात्रारूपे नतास्वस्त्वामर्द्धमात्रास्थितेम्बिके ।।
यजमानश्च भोक्ता त्वं भोज्यं यज्ञश्च शाश्वतः ।
स्वाहा स्वधा वषट् मन्त्रवह्निरूपे नमोस्तु ते ।।
एवं स्तुतिं समाकर्ण्य शक्त्या युक्तस्तदामरौ ।
प्रदर्शयत्स्वकं लिङ्गं शक्त्या विरहितं परम् ।।
संस्कृत्याम्भसि तत्स्तम्भं लिङ्गं च तेजसां परम् ।
प्रमाणं धनुषश्चार्द्धात् पञ्चवक्त्रं प्रधारयन् ।।
तयोः स्तुतिप्रसंतुष्टाज्ज्वालामालिनमीश्वरम् ।
स्वबाहुभ्यां समालिंग्य बबंध स्वाञ्जलिं शिवा ।।
पञ्चास्यमक्षमालाश्च घटं पूर्णामृतं तथा ।
दधानं दिक्करैर्लिङ्गं सपीठिकमपश्यताम् ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नागावतंससुश्रोतं नागग्रैवेयकोज्ज्वलम् ।
अहिकंकणकेयूरसर्वाभरणभूषितम् ।।
चन्द्रार्काग्नीक्षणैश्चिह्नं जटाचूडेन्दुशेखरम् ।
रञ्जितं पञ्चरङ्गाद्यैः पञ्चात्मकं तथात्मभिः ।।
एवं प्रदर्शयन्देवौ अर्द्धात्मानं महेश्वरम् ।
व्याचष्टे सगुणश्चापि वरं दातुं च निर्गुणः ।।

श्री ईश्वर उवाच ।

सर्वस्वरूपोहमगोचरोहं
मद्भक्तिहीनैरसतां जनानाम् ।
तेषां मनस्तामस्याश्रितं मां
पश्यन्ति चांधा न यथा प्रदीपम् ।।
निमित्तं हि सर्वस्वरूपोहमात्मा
अशेषासुभृन्मानसाब्जस्थितोहम् ।
निरस्तं जनानां मया चित्तरागं
सदा भक्तियुक्तांगिनां मज्जनानाम् ।।
जनानां मनःस्थोनिशं प्रेरकोऽहं
मनोबुद्धिचित्ताभिमानस्वरूपः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

जनान्तेषु कार्येषु षड्विंशतत्वै-
रजोहं च तत्तत्कृतोहं सदात्मा ।।
अविद्याश्रितोहं परं ज्योतिरीशो
विपद्येषु कार्याश्रितस्तेषु चाहम् ।
विपद्याभिलब्धोऽपि नैवं तथा तै-
रनिर्लेपतेजःस्वरूपोहमात्मा ।।
स्वकीयैश्च कायः सुखदुःखमाढ्यं
जना भुंजयन्तो मया जन्यते ते ।
स्वकर्माभिवन्द्यां स्वकाले हनिष्ये
प्ररक्षे निविष्टान्सुधर्मेषु यावत् ।।
पुरोद्भूतकर्माणि सन्त्यज्य मर्त्या
मम प्रेमबद्धाः श्रिता विद्यया ये ।
पतंत्यंहकृत्च्छ्रेषु मद्भक्तिहीनाः
कुकर्मप्ररूढाः सतोऽसत्यभाजः ।।
यजन्तीश्वरं मां त्रिभिश्चैकवाक्यैः
शिवैतीश्वरेति ह्यपि त्यागहीनाः ।
विहायानिवृत्तिं प्रपीडाजनिञ्च
विशंतीश्वरे मय्यजे मोक्षभद्रे ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पुरा कृत्यकृत्योद्भवैर्नो व्यथाक्ता
मदंशाश्रिताभ्यंतरो चाप्यवीचौ ।
यतंत्यल्पजीवा यदिप्रेमभक्त्या
सकृत्सेवते मां स चानायि नाकम् ।।

अभूवन्मनुष्या दृढैर्नः प्रसक्ता
मखैर्धर्मदानैर्विहीनाल्पजीवाः ।
विधे कृष्ण नस्ते विहायान्यसक्ता
अतोऽहारि सर्वं ममांशैः पयोभिः ।।

मदंशावतारा वियद्वह्निपृथ्वी
मरुच्चन्द्रसूर्य्याः शिवायाच्युतापः ।
धृताः सर्वलोका दशांशैः समेतै-
र्यदा न प्रमाणं हरिष्ये च सर्वम् ।।

एतद्रूपं ममैवाद्यं जानीतां सततं युवाम् ।
सर्वदेहाश्रितं देवं तेजस्विनं सदाच्युतम् ।।

इति श्रीस्कंदपुराणे हिमवत्खण्डे श्रीईश्वर-
वाक्यं नाम षट्सप्ततितमोध्यायः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीगणेशाय नमः। ॐ नमो वटुकभैरवाय।
कैलासशिखरासीनं देवदेवं जगद्गुरुम्।
शङ्करं परिपप्रच्छ पार्वती परमेश्वरम् ॥१

श्रीपार्वत्युवाच।
भगवन् सर्वधर्मज्ञ सर्वशास्त्रागमादिषु।
आपदुद्धरणं मंत्रं सर्वसिद्धिप्रदं नृणाम् ॥२
सर्वेषाञ्चैव भूतानां हितार्थं वाञ्छितं मया।
विशेषस्तु राज्ञां वै शान्तिपुष्टिप्रसाधनम् ॥३
अङ्गन्यासकरन्यासबीजन्यासमन्वितम्।
वक्तुमर्हसि देवेश मम हर्षविवर्द्धनम् ॥४

श्रीभगवानुवाच।
शृणु देवि महामन्त्रमापदुद्धारहेतुकम्।
सर्वदुःखप्रशमनं सर्वशत्रुनिवर्हणम् ॥५
अपस्मारादिरोगाणां ज्वरादीनां विशेषतः।
नाशनं स्मृतिमात्रेण मन्त्रराजमिमं प्रिये ॥६
ग्रहराजभयानाञ्च नाशनं सुखवर्द्धनम्।
स्नेहाद्वक्ष्यामि ते मंत्रं सर्वसारमिमं प्रिये ॥७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वकामार्थदं मत्रं राज्यभोगप्रदं नृणाम् ।
आपदुद्धरणं मंत्रं वक्ष्यामि ते विशेषतः ॥८
प्रणवं पूर्वमुच्चार्य देवीप्रणवमुद्धरेत् ।
वटुकायेति वै पश्चादापदुद्धरणाय च ॥ ९
कुरुद्वयं ततः पश्चाद्वटुकाय पुनः क्षिपेत् ।
देवीप्रणवमुद्धृत्य मंत्रोद्धारमिमं प्रिये ॥ १०
मन्त्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभम् ।
अप्रकाश्यमिमं मंत्रं सर्वशक्तिसमन्वितम् ॥११
स्मरणादेव मन्त्रस्य भूतप्रेतपिशाचकाः ।
विद्रवन्ति भयार्ता वै कालरुद्रादिव प्रजाः ॥१२
पठेद्वा पाठयेद्वापि पूजयेद्वापि पुस्तकम् ।
नाग्निचौरभयं वापि ग्रहराजभयं तथा ॥१३
न च मारीभयं तस्य न च भूतभयं तथा ।
न शत्रुभ्यो भयं तस्य सर्वत्र सुखवान् भवेत् ॥१४
आयुरारोग्यमैश्वर्यं पुत्रपौत्रादिसम्पदः ।
भवन्ति सततं तस्य पुस्तकस्यापि पूजनात् ॥१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीपार्वत्युवाच ।

य एष भैरवो नाम आपदुद्धारको मतः ।
त्वया च कथितो देव भैरवः कल्प उत्तमः ॥१५
तस्य नाम सहस्त्राणि अयुतान्यर्बुदानि च ।
सारमुद्धृत्य तेषां वै नामाष्टशतकं वद ॥१६

श्रीभगवानुवाच ।

यस्तु संकीर्तयेदेतत्सर्वदुष्टनिबर्हणम् ।
सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च ॥ १७
शृणु देवि प्रवक्ष्यामि भैरवस्य महात्मनः ।
आपदुद्धारकस्येह नामाष्टशतमुत्तमम् ॥१८
सर्वपापहरं पुरायं सर्वापद्विनिवारकम् ।
सर्वकामार्थदं देवि साधकानां सुखावहम् ॥१९
देहाङ्गन्यासकञ्चैव पूर्वं कुर्यात् समाहितः ।
भैरवं मूर्ध्नि विन्यस्य ललाटे भीमदर्शनम् ॥२०
अक्षणोर्भूताश्रयं न्यस्य वदने तीक्ष्णदर्शनम् ।
क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत् ॥२१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

क्षेत्राख्यं नाभिदेशे तु कट्यां सर्वाघनाशनम् ।
त्रिनेत्रमूर्वो विन्यस्य जङ्घयोः रक्तपाणिकम् ॥२२
पादयोर्देवदेवेशं सर्वाङ्गे बटुकं न्यसत् ।
एवं न्यासविधिं कृत्वा तदनन्तरमुत्तमम् ॥२३
पठेदेकमनाः स्तोत्रं नामाष्टशतसंज्ञकम् ।
नामाष्टशतकस्यापि छन्दोऽनुष्टुबुदाहृतम् ॥२४
बृहदारण्यको नाम ऋषिश्च परिकीर्तितः ।
देवता कथिता चेह सद्भिर्वटुकभैरवः ।
सर्वकामार्थसिध्यर्थे विनियोगः प्रकीर्तितः ॥२५
भैरवो भूतनाथश्च भूतात्मा भूतभावनः ।
क्षेत्रदः क्षेत्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् ॥२६
श्मशानवासी मांसाशी खर्पराशी मखान्तकृत् ।
रक्तपः प्राणपः सिद्धः सिद्धिदः सिद्धसेवितः ॥२७
करालः कालशमनः कला-काष्ठा-तनुः कविः ।
त्रिनेत्रो बहुनेत्रश्च तथा पिङ्गललोचनः ॥२८
शूलपाणिः खड्गपाणिः कङ्कालो धूम्रलोचनः ।
अभीरुर्भैरवो भीमो भूतपो योगिनीपतिः ॥२९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

धनदो धनहारी च धनपः प्रतिभाववान् ।
नागहारो नागकेशो व्योमकेशः कपालभृत् ।।३०
कालः कपालमाली च कमनीयः कलानिधिः ।
त्रिलोचनो ज्वलन्नेत्रस्त्रिशिखी च त्रिलोकपात् ।।३१
त्रिवृत्ततनयनो डिम्भः शान्तः शान्तजनप्रियः ।
वटुको वटुकेशश्च खट्वाङ्गवरधारकः ।।३२
भूताध्यक्षः पशुपतिर्भिक्षुकः परिचारकः ।
धूर्तो दिगम्बरः सौरिर्हरिणः पाण्डुलोचनः ।।३३
प्रशान्तः शान्तिदः शुद्धः शङ्करः प्रियबान्धवः ।
अष्टमूर्तिनिधीशश्च ज्ञानचक्षुस्तपोमयः ।।३४
अष्टाधारः सर्वयुक्तः शशी विषधरः शिखः ।
भूधरो भूधराधीशो भूपतिर्भूधरात्मकः ।।३५
कङ्कालधारी मुण्डी च नागयज्ञोपवीतवान् ।
जृम्भणो मोहनस्तम्भी मारणः क्षोभणस्तथा ।।
३६
शुद्धनीलाञ्जनप्रख्यदेहो मुण्डविभूषितः ।
वलिभुग्वलिभूतात्मा कामी कामपराक्रमः ।।३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

सर्वापत्तारको दुर्गो दुष्टभूतनिषेवितः ।
कालीकलानिधिः कान्तः कामिनी-वशकृद्वशी ।।३८
सर्वसिद्धिप्रदो वैद्यः प्रभविष्णुः प्रभाववान् ।
अष्टोत्तरशतं नाम भैरवस्य महात्मनः ।।३९
मया ते कथितं देवि रहस्यं सर्वकामदम् ।
य इदं पठति स्तोत्रं नामाष्टशतमुत्तमम् ।।४०
न तस्य दुरितं किञ्चिन्न रोगेभ्यो भयं तथा ।
न शत्रुभ्यो भयं किञ्चित्प्राप्नोति मानवः क्वचित् ।।४१
पातकानां भयं नैव पठेत्स्तोत्रमनन्यधीः ।
मारीभये राजभये तथा चौराग्निजे भये ।।४२
औत्पातिके महाघोरे तथा दुःस्वप्नजे भये ।
बंधने च महाघोरे पठेत्स्तोत्रं समाहितः ।।४३
सर्वे प्रशमनं यान्ति भयं भैरवकीर्तनात् ।
एकादशसहस्रन्तु पुरश्चरणमिष्यते ।। ४४
त्रिसंध्यं यः पठेद्देवि संवत्सरमतन्द्रितः ।
स सिद्धिं प्राप्नुयादिष्टां दुर्लभामपि मानुषः।। ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

षण्मासान्भूमिकामस्तु स जपत्वा लभते महीम् ।
राजशत्रुविनाशाय जपेन्मासाष्टकं पुनः ।।४६
रात्रौ वारत्रयं चैव नाशयत्येव शात्रवान् ।
जपेन्मासत्रयं रात्रौ राजानं वशमानयेत् ।।४७
धनार्थी च सुतार्थी च दारार्थी यस्तु मानवः ।
पठेद्वारत्रयं यद्वा वारमेकं तथा निशि ।।४८
धनं पुत्रांस्तथा दारान् प्राप्नुयान्नात्र संशयः ।
रोगी रोगात्प्रमुच्येत बद्धो मुच्येत बंधनात् ।।४९
भीतो भयात् प्रमुच्येत देवि सत्यं न संशयः ।
यान् यान् समीहते कामाँस्तांस्तान् प्राप्नोति नित्यशः ।।५०
अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्य चित् ।
सुकुलीनाय शान्ताय ऋजवे दम्भवर्जिते ।।५१
अथवा प्रियशिष्याय पुत्राय सुहृदे भृशम् ।
दद्यात्स्तोत्रमिदं पुण्यं सर्वकामफलप्रदम् ।।५२
ध्यानं वक्ष्यामि देवस्य यथा ध्यात्वा पठेन्नरः ।
शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम् ।।५३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

अष्टबाहुं त्रिनयनं चतुर्बाहुं द्विबाहुकम् ।
भुजङ्गमेखलं देवमग्निवर्णशिरोरुहम् ॥५४
दिगम्बरं कुमारीशं वटुकाख्यं महाबलम् ।
खट्वाङ्गमसिपाशञ्च शूलञ्चैव तथा पुनः॥५५
डमरूञ्च कपालञ्च वरदं भुजगं तथा ।
नीलजीमूतसंकाशं नीलाञ्जनसमप्रभम् ॥५६
द्रंष्ट्राकरालवदनं नूपुराङ्गदसंकुलम् ।
आत्मवर्णसमोपेत-सारमेयसमन्वितम् ।
ध्यात्वा जपेत्सुसंहृष्टः सर्वान् कामानवाप्नुयात्॥५७
ॐ करकलितकपालः कुण्डली दण्डपाणि-
स्तरुणतिमिरनीलो व्यालयज्ञोपवीती ।
ऋतुसमयसपर्याविघ्नविच्छेदहर्ता
जयति वटुकनाथः सिद्धिदः साधकानाम् ॐ॥५८
एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमम् ।
भैरवाय प्रहृष्टा भूत्स्वयं चैव महेश्वरी ॥५९
इति विश्वसारोद्धारे आपदुद्धारकल्पे
वटुकभैरवस्तवराजः संपूर्णः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

श्रीभगवच्चन्द्रिका.

श्रीमृत्युञ्जयाय नमः ।

कैलासस्योत्तरे शृङ्गे शुद्धस्फटिकसन्निभे ।
तमोगुणविहीने तु जरामृत्युविवर्जिते ।।१
सर्वार्थसंपदाधारे सर्वज्ञानकृतालये ।
कृताञ्जलिपुटो भूत्वा सुखासीनं सदाशिवम् ।।२
पप्रच्छ प्रणतो ब्रह्मा जानुभ्यामवनिं गतः ।
केनोपायेन देवेश चिरायुर्लोमशोऽभवत् ।।३
तन्मे ब्रूहि महेशान लोकानां हितकाम्यया ।
हितकारणलोकानां त्रैलोक्ये सचराचरे ।।४
श्रीमहादेव उवाच ।
शृणु ब्रह्मन् प्रवक्ष्यामि चिरायुर्मुनिसत्तमः ।
सञ्जातः कर्मणा येन व्याधिमृत्युविवर्जितः ।।५
तस्मिन्नेकार्णवे घोरे सलिलौघपरिप्लुते ।
कृतान्तभयनाशार्थं स्तुतो मृत्युञ्जयः शिवः ।।६
तस्य संकीर्तनान्नित्यं मुनिर्मृत्युविवर्जितः ।
तमेव कीर्तय ब्रह्मन् मृत्युं जेतुं न संशयः ।।७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ अस्य श्रीमृत्युञ्जयस्तोत्रमन्त्रस्य लोमशऋषि
रनुष्टुपछन्दः श्रीमृत्युञ्जयो देवता आयुरारोग्या-
भिवृद्धये पाठे विनियोगः ।

ध्यानम् ।

शुद्धं श्वेतावदातं
वृषहरिगमनं जाप्यमालां त्रिशूलं
विभ्राणं कुम्भहस्तं
वरमभयकरं शक्तियुक्तं त्रिनेत्रम् ।

पूजाजाप्यादिमंत्रै-
र्वलिकुसुमयुतैर्धूपदीपादिवर्गै-
र्नत्वा मृत्युञ्जयाख्यं
स्तोत्रमृतिभयहरणंस्तोत्रमेतत्करिष्ये ॥८

ॐ नमो देवाधिदेवेश सर्वप्राणभृताम्वर ।
प्राणिनामपि नाथस्त्वं मृत्युञ्जय नमोस्तुते ॥९
देहिनां जीवभूतोसि जीवो जीवस्य कारणम् ।
जगतां रक्षकस्त्वं हि मृत्युञ्जय नमोस्तुते ॥१०
हिमाद्रिशिखराभास सुधावीचिमनोहर ।
पुण्डरीकसिताभास मृत्युञ्जय नमोस्तुते ॥११

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

नागहार महाप्राज्ञ सर्वज्ञानैककारण ।
परित्रातासि लोकानां मृत्युञ्जय नमोस्तु ते ।।१२
निहता येन कालेन सदेवासुरमानुषाः ।
गंधर्वाप्सरश्चैव सिद्धविद्याधरोरगाः ।१३
साध्याश्च वसवो रुद्रास्तथाश्विनिसुतावुभौ ।
मरुतश्च दिशो नागास्थावराजङ्गमास्तथा ।।१४
जीवितास्ते तव ध्यानान्मृत्युञ्जय नमोस्तु ते ।१५
ये ध्यायन्ति परां मूर्तिं पूजयन्ति नरादयः ।
न ते मृत्युवशं यान्ति मृत्युञ्जय नमोस्तु ते ।। १६
त्वमोङ्कारोसि वेदानां देवानां च सदाशिवः ।
आधारशक्तिः शक्तीनां मृत्युञ्जय नमोस्तु ते ।।१७
स्थावरे जङ्गमेवापि यावत्तिष्ठन्ति देहिन : ।
जीवन्तीत्याह लोकोयं मृत्युञ्जय नमोस्तु ते ।। १८
सोमसूर्याग्निमध्यस्थ व्योमव्यापित्सदाशिव ।
कालत्रयमहाकाल मृत्युञ्जय नमोस्तु ते ।। १९
प्रबुद्धे चाप्रबूद्धे च त्वं जगत्सृजसि प्रभो ।
सृष्टिरूपेण देवेश मृत्युञ्जय नमोस्तुते ।। २०

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्योम्नि त्वं व्योमरूपोसि तेजः सर्वत्र तेजसि ।
ज्ञानिनां ज्ञानरूपोसि मृत्युञ्जय नमोस्तु ते ।।२१
जगज्जीवो जगत्प्राणः स्रष्टा त्वं जगतां प्रभुः ।
कारणं सर्वतीर्थानां मृत्युञ्जय नमोस्तु ते ।। २२
तेजस्त्वमिन्द्रियाणां च सर्वज्ञानप्रबोधकः ।
सांख्ययोगश्च हंसश्च मृत्युञ्जय नमोस्तु ते ।।२३
रूपातीतञ्च रूपञ्च पिण्डस्थपदमेव च ।
चतुर्योगकलाधार मृत्युञ्जय नमोस्तु ते ।। २४
रेचके वह्निरूपोसि सोमरूपोसि पूरके ।
कुम्भके शिवरूपोसि मृत्युञ्जय नमोस्तु ते ।।२५
क्षयं करोषि पापानां पुण्यानां चापि वर्द्धनम् ।
त्वं हेतुः श्रेयसां नित्यं मृत्युञ्जय नमोस्तु ते ।।२६
त्वं प्रबोधस्त्वमाधारस्त्वं बीजं भुवनत्रयम् ।
सत्त्वंरजस्तमस्त्वं हि मृत्युञ्जय नमोस्तु ते ।।२७
त्वं सोमस्त्वं दिनेशश्च त्वमात्मा प्रकृतेः परः ।
अष्टत्रिंशत्कलाधार मृत्युञ्जय नमोस्तु ते ।।२८
सर्वेन्द्रियगुणाधार सर्वभूतगुणाश्रय ।
सर्वज्ञानमयानन्द मृत्युञ्जय नमोस्तु ते ।। २९

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

त्वमात्मा सर्वप्रकृतिस्त्वं गुणानामधीश्वरः ।
सर्वानन्दमयाधार मृत्युञ्जय नमोस्तु ते ।। ३०
त्वं यज्ञः सर्वयज्ञानां त्वं बुद्धिर्बोधलक्षणा ।
शब्दब्रह्म त्वमेवासि मृत्युञ्जय नमोस्तु ते ।।३१
सर्वमायाकलाधार सर्वेन्द्रियपरात्पर ।
सर्वेन्द्रियगुणाधीश मृत्युञ्जय नमोस्तुते ।। ३२
रूपं गन्धस्तथा स्पर्शः शब्दः संस्कार एव च ।
चतुःप्रकारमेतेषां मृत्युञ्जय नमोस्तु ते ।। ३३
चतुर्विधानां सृष्टीनां हेतुस्त्वं कारणेश्वरः ।
भावाभावपरिच्छिन्न मृत्युञ्जय नमोस्तु ते ।।३४
त्वमनादिरनन्तश्च नित्यानित्यस्त्वमेव च ।
शक्तिस्त्वमेव देवेश मृत्युञ्जय नमोस्तु ते ।।३५
त्वमेको निष्कलो देवः सकलं भुवनत्रयम् ।
अतिसूक्ष्मातिरूपस्त्वं मृत्युञ्जय नमोस्तु ते।।३६
अनन्तकान्तिसंपन्नमनन्तासनसंस्थितम् ।
अनन्तशक्तिसंभोग मृत्युञ्ज नमोस्तु ते ।। ३७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

व्यक्ताव्यक्तस्वरूपेण व्याप्तं विश्वमनन्तकम् ।
विश्वात्मा विश्वरूपस्त्वं मृत्युञ्जय नमोस्तु ते।।३६
त्वं हि नः परमा विद्या त्वं हि नः परमा गतिः ।
त्वं हि नः कारणं कर्म मृत्युञ्जय नमोस्तु ते ।।३६
क्लेशादीनां प्रहर्ता त्वं कर्ता लोकस्य सर्वतः ।
भुक्तिमुक्तिप्रदाता च मृत्युञ्जय नमोस्तु ते ।। ४०
प्रकृतेरादि पुरुषस्त्वमीशः परमः शिवः ।
सदाधारप्रजानां च मृत्युञ्जय नमोस्तु ते ।।४१
एवं संङ्कीर्तयेद्यस्तु शुचिः प्रयतमानसः ।
भक्तचा शृणोति यो ब्रह्मन्न मृत्युवशगो भवेत् ।
नाल्पमृत्युभयं तस्य चिरकालं स जीवति ।
व्याधयो नोपपद्यन्ते नोपसर्गभयं भवेत् ।। ४३
इदं रहस्यं परमं देवस्य हंसयोगिनः । ४४ } - देवदहेन
दुःस्वप्ननाशनं पुण्यं सर्वारिष्टविनाशनम् ।। ४६
सुस्वप्नवर्द्धनं नित्यं सर्वदुष्कृतनाशनम् ।
सर्वपापविनिर्मुक्त : शिवलोकं स गच्छति ।। ४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

शतवर्षं स जीवेत्तु पुत्रपौत्रप्रतिष्ठितः ।
उत्तमोत्तमविप्रः स्यादुत्तमः पुरुषोत्तमः ।। ४८
मृत्युञ्जयेन जप्तेन चिरकालं स जीवति ।
सप्तजन्मकृतात्पापान्मुच्यते नात्र संशयः ।। ४९
इति श्रीपारमेश्वरे तन्त्रे चतुरशीतिसाहस्रे
मृत्युञ्जयस्तोत्रं संपूर्णं शुभम् ।

ओमित्येकाक्षरं ब्रह्म व्याहरन् मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ।।१
स्थाने हृषीकेश तवप्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसंघाः ।।२
सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम् ।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति ।।३
कविं पुराणमनुशासितार-
मणोरणीयांसमनुस्मरेद्यः ।
सर्वस्य धातारमचिन्त्यरूप-
मादित्यवर्णं तमसः परस्तात् ।।४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम् ।
छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् ।।५

सर्वस्य चाहं हृदि सन्निविष्टो
मत्तः स्मृतिर्ज्ञानमपोहनं च ।
वेदैश्च सर्वैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ।।६

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
मामेवैष्यसि मुक्त्वैवमात्मानं मत्परायणः ।।७

इति श्रीमद्भगवद्गीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे सप्तश्लोकीगीता शुभम् ।

शिव उवाच ।

देवित्वं भक्तसुलभे सर्वकार्यविधायिनी ।
कलौ हि कार्यसिद्ध्यर्थमुपायं ब्रूहि यत्नतः ।।

देव्युवाच ।

शृणु देव प्रवक्ष्यामि कलौ सर्वेष्टसाधनम् ।
मया तवैव स्नेहेनाप्यम्बास्तुतिः प्रकाश्यते ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

ॐ अस्य श्रीदुर्गासप्तश्लोकीस्तोत्रमन्त्रस्य नारायण-ऋषिः अनुष्टुपछन्दः श्रीमहाकालीमहालक्ष्मीमहासरस्वत्यो देवताः दुर्गाप्रीत्यर्थं सप्तश्लोकीदुर्गापाठे विनियोगः ।

ॐ ज्ञानिनामपि चेतांसि देवी भगवती हि सा ।
बलादाकृष्य मोहाय महामाया प्रयच्छति ।।१

दुर्गे स्मृता हरसि भीतिमशेषजन्तोः
स्वस्थैः स्मृता मतिमतीव शुभां ददासि ।
दारिद्र्यदुःखभयहारिणि का त्वदन्या
सर्वोपकारकरणाय सदार्द्रचित्ता ।।२

सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ।
शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ।।३

शरणागतदीनार्तपरित्राणपरायणे ।
सर्वस्यार्तिहरे देवि नारायणि नमोऽस्तु ते ।।४

सर्वस्वरूपे सर्वेशे सर्वशक्तिसमन्विते ।
भयेभ्यस्त्राहि नो देवि दुर्गे देवि नमोऽस्तु ते।।५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

रोगानशेषानपहंसि तुष्टा
रुष्टातु कामान् सकलानभीष्टान् ।
त्वामाश्रितानां न विपन्नराणां
त्वामाश्रिता ह्याश्रयतां प्रयान्ति ।।६
सर्वाबाधाप्रशमनं त्रैलोक्यस्याखिलेश्वरि ।
एवमेव त्वया कार्यमस्मद्वैरिविनाशनम् ।।७
इतिश्रीसप्तश्लोकीदुर्गास्तवः सम्पूर्णः ।
यत्सर्वशास्त्रसिद्धान्तं यत्सर्वहृदयानुगम् ।
यत्सर्वं सर्वगं वस्तु तच्चित्तत्त्वंमुपास्महे ।।
यः स्वात्मनीदं निजमाययार्पितं
क्वचिद्विभातं क्व च तत्तिरोहितम् ।
अविद्धदृक्साक्ष्युभयं तदीक्षते ।
स आत्ममूलोऽवतु मां परात्परः ।।
श्रीमद्भागवतम् ८।३।४
शश्वत्स्वरूपमहसैव निपीत भेदमोहाय
बोधधिषणाय नमः परस्मै ।।
श्रीभागवतम् ३।६।१४

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृष्ठ ६१ मा छुटेका श्लोकहरू:—

अत्यासन्नतरे काले शतैरावर्तने कृते ।
मृत्युर्न जायते तस्य रोगस्तं च विमुञ्चति ।। ४४

पञ्चम्यां वा दशम्यां वा पौर्णमास्यामथापि वा ।
शतमावर्तयेद्यस्तु शतवर्षं स जीवति ।। ४५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

पृष्ठ	पंक्ति	अशुद्धिः	शुद्धिः
४	१६	रविशेष	रविशेषं
१३	११	,,	,,
३१	१८	तेष्वस्थितः	तेष्ववस्थितः
३८	४	याथान्म्यं	याथात्म्यं
४६	७	पादे	पदे
५०	१२	ज्ञामध्ये	ज्ञानमध्ये
५८	१४	हेम	सोम
५६	३		६।७०
८६	१३	शान्नाशष	शान्ताशेष
६१	१	केववं	केवलं
१००	१६	आत्माज्ञानान्मोक्षः	आत्मज्ञानान्मोक्षः
१२८	१७	अन्तदृग्दृश्ययोर्भेदं	अन्तर्दृग्दृश्ययोर्भेदं
१५८	७	ग्राह्याभाव	ग्राह्याभावे
१६०	७	कमणः	कर्मणः
१६६	१०	शीषम्	शीर्षम्
१७०	१	परमार्थं	परमार्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

वाल्मीकिविद्यापीठपुस्तकालयः

प्रत्यावर्तनतिथिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri

गोरखापत्र छापाखानामा मुद्रित ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu